Civil Services (Main) Examination- 2025

SLPM–D–SNKT

संस्कृतम्

द्वितीयं प्रश्नपत्रम्

(साहित्यम्)

समयः होरात्रयम् (घण्टा-त्रयम्)

पूर्णाङ्काः 250

प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः

कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः

खण्डद्वये विभाजिताः **अष्टौ** प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रथम-पञ्चमौ प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

चतुर्थ-पञ्चम-षष्ठप्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्टः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

SANSKRIT

PAPER—II

(LITERATURE)

Time Allowed : Three Hours

Maximum Marks : 250

QUESTION PAPER SPECIFIC INSTRUCTIONS

Please read each of the following instructions carefully before attempting questions

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

Optional Province · optionalprovince.com

खण्ड—A / SECTION—A

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (*150*) शब्दैः विधीयताम्—

Each answer along with examples of the following questions to be written within *150* words : 10×5=50

(a) ''नैषधे पदलालित्यम्'' इत्युक्तेः याथार्थ्यं प्रतिपादयत।

Establish the validity of the saying—''नैषधे पदलालित्यम्''.

(b) रघुवंशमहाकाव्यस्याधारेण कालिदासस्य कवित्वं स्फुटयत।

Reveal the poetic excellence of Kālidāsa on the basis of the epic, *Raghuvaṃśa.*

(c) किरातार्जुनीयमहाकाव्यस्य शिशुपालवधमहाकाव्यस्य **वा** काव्यसौष्ठवं विवृणुत।

Describe the poetical excellence either of the epic, *Kirātārjunīya* or of the epic, *Śiśupālavadha.*

(d) गद्यरचनासु कादम्बर्याः वैशिष्ट्यं सविशदं निरूपयत।

Elucidate in detail the specialities inherent in the text, *Kādambarī* in the field of Sanskrit prose literature.

(e) दशकुमारचरितग्रन्थस्य परिचयं तथा वैशिष्ट्यजातं च संक्षेपेणोपस्थापयत।

Enumerate the identity and the special features too of the text, *Daśakumāracarita.*

2. अधोनिर्दिष्टानां विषयाणां सारगर्भिता समीक्षणीया—

Interpret the purport of the following :

(a) ''ईशावास्यमिदं सर्व्वं यत् किञ्च जगत्यां जगत्'' इति वाक्यस्य तात्पर्यं विशदयत।

Elucidate the significance of the statement—''ईशावास्यमिदं सर्व्वं यत् किञ्च जगत्यां जगत्''. 15

(b) भगवद्गीतायां वर्णितानां विविधानां योगानां परिचयं महत्त्वं च प्रतिपादयत।

Ascertain the identity and utility of various 'Yogas' stated in the *Bhagavadgītā.* 20

(c) वाल्मीकिरामायणे सुन्दरकाण्डस्य राजनीतौ अर्थशास्त्रस्य **वा** महत्त्वं प्रकाशयत।

Enumerate the excellence either of the Sundarakāṇḍa of the Vālmīki's *Rāmāyaṇa* or same of that of the *Arthaśāstra* in the field of polity. 15

3. अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया—

Analyze in detail the following :

(a) अभिज्ञानशाकुन्तलस्य स्वप्नवासवदत्तस्य **वा** नाटकस्य कथावस्तु संक्षेपेण प्रकाशयत।

Describe in short the story either of the drama, *Abhijñānaśākuntala* or of the drama, *Svapnavāsavadatta.* 15

Optional Province · optionalprovince.com

(b) ''उत्तरे रामचरिते भवभूतिर्विशिष्यते'' इत्यस्याः उक्तेः सार्थकताम् उत्तररामचरितनाटकस्याधारेण प्रकाशयत।

Elaborate the validity of the dictum ''उत्तरे रामचरिते भवभूतिर्विशिष्यते'' relating to the drama, *Uttararāmacarita*. 20

(c) वेणीसंहारनाटके महाभारतस्य प्रभावं सोदाहरणं वर्णयत।

Describe the influence of the epic, *Mahābhārata* on the drama, *Veṇīsaṃhāra* with apt examples. 15

4. अधोलिखितानां विषयाणां विवेचनं देवभाषयैव देवनागरीलिप्यामेव च कर्तव्यम्—

The answers of the following questions must be written in Sanskrit language and in Devanāgarī script only :

(a) पञ्चतन्त्रग्रन्थस्य परिचयं संक्षेपेण दत्त।

Elucidate the identity of the text, *Pañcatantra* in short. 20

(b) राजतरङ्गिण्याः प्रथमतरङ्गस्य विषयवस्तूनि निरूपयत।

Enumerate the subject matters found in the First Taraṅga of the text, *Rājataraṅgiṇī*. 15

(c) अमरुशतकान्तर्गतस्य कस्यचित्पद्यस्य उल्लेखपूर्वकं तत्तात्पर्यं वर्णयत।

Elaborate the significance mentioning of any one verse belonging to the text, *Amaruśataka*. 15

खण्ड—B / SECTION—B

5. नागराक्षरैः संस्कृतभाषायां प्रत्येकं सार्धशतेन (*150*) शब्दैः व्याख्यायताम्—

Explain each of the following verses in Sanskrit language and in Devanāgarī script only (within *150* words) : 10×5=50

(a) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

(b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(c) वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥

(d) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

(e) तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्धरं विरोधोऽपि समं महात्मभिः॥

Optional Province · optionalprovince.com

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया—

Explain the following verses in Sanskrit language and in Devanāgarī script only :

(a) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥ 15

(b) वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥ 20

(c) नीलनागाभया वेण्या जघनं गतयैकया।
नीलया नीरदापाये वनराज्या महीमिव॥ 15

7. अधोलिखितानामाशयः ससन्दर्भं प्रतिपादनीयः —

Elaborate the idea of the following verses with reference :

(a) तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥ 15

(b) बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥ 15

(c) अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरम् उपजनयति। 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या—

Explain the following verses with context :

(a) किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः॥ 20

(b) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥ 15

(c) सतां केनापि कार्येण लोकस्याराधनं व्रतम्।
यत् पूरितं हि तातेन माञ्च प्राणांश्च मुञ्चता॥ 15

★★★

Optional Province · optionalprovince.com